# वैदिकसाहित्ये पर्यावरणशिक्षा


**डॉ.पापूरणीसासमल**

*योगदा सत्सङ्ग पालपाड़ा महाविद्यालय, पालपाड़ा, पूर्वमेदिनीपुर, पश्चिमवंग*

Email: papurani123@gmail.com



***Received***
*22/06/2025*

***Accepted***
*27/06/2025*

***Published***
*04/07/2025*



**प्रबन्धसार**

अखिले जगति पर्यावरणसंरक्षणविषये जागरः दिने दिने वर्धमानो भवति। अस्मिन् सन्दर्भे जागरणं बहुत्र प्रचलदस्ति। तथापि पर्यावरणसंरक्षणे पूर्णरूपेण जाग्रदवस्था अद्यापि न समुपलब्धा।

पर्यावरण – विषयकं भारतीयचिन्तने वेदेषु, स्मृतिषु, पुराणग्रन्थेषु च पर्यावरण– संरक्षणाय बहुधा निर्देशः प्राप्यते।


**पर्यावरणस्यार्थः**

तर्हि प्रश्नमुदेति किं नाम पर्यावरणम्? अस्य स्पष्टीकरणं तु बहुप्रकारैः भविष्यति। **परि + आ+ वृ धातोः ल्यूट प्रत्यये कृते पर्यावरणशब्दः निष्पद्यते।** परन्तु संक्षेपेण कथ्यते चेत – यानि तत्त्वानि अस्मान् आच्छादयति, अस्माकं चतुर्पार्श्वे विद्यन्ते, अस्माकं कृते ये बहिस्थाः, येषामस्माकमुपरिप्रभावं परिलक्ष्यते, परिनामेण अस्माकं प्रतिक्रियादयः प्रकट्यन्ते, तानि तत्त्वानि पर्ययिवरणपदेन समाकलितानि सन्ति।

अस्माकं चतुर्पार्श्वे परिवेष्टिता भौतिक - रासायनिक – जैविकावस्था हि पर्यावरणम्। अस्माकं परितः जल-वायु-मृदु-उद्भिद-जीवधारी-अनुजीवानां च समाहारः एव पर्यावरणम्। एतैः सह प्रकृत्याः अन्यानि पर्वतनदीवृक्षादिरूपाणि उपादानानि मिलित्वा पृथग्रूपेण वा अस्माकं पर्यावरणं रचयन्ति। पर्यावरणस्य उपादानविषये आर्षवचनं भवति –

**यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः।**
**यस्यामिदं जिन्वति प्राणदेजत्सा नो भूमिः पूर्वपेये दधातु॥**[1]

परिशुद्धे पर्यावरणे वयं दैनन्दिनकर्म सद्विचारं सुखेन जीवनयापनं च कर्तुं शक्नुमः। प्रकृतिः फलैः पुष्पैः अन्यैश्च प्रकारैः अस्मान् पुष्णाति। अततस्या रक्षा कर्तव्या।

पर्यावरणस्य सुरक्षार्थं छात्रेभ्यः प्रौढेभ्यः सर्वेभ्यः शिक्षाप्रदानमेकान्तमावश्यकम्। पर्यावरणविषयचेतना शिक्षार्थीनां मनसि अवश्यमेव स्थापनीया। पर्यावरणशिक्षा प्रत्येकस्तरीयविद्यार्थीनां कृते औपचारिकानौपचारिकशिक्षामाध्यमयोः समाहिता अवश्यं भवेत्।

भारतीयसंस्कृतौ पर्यावरणचेतना पर्यावरणप्रदूषणनिवारणाय उपायाः च चर्चिताः विद्यन्ते। तत्र स्वात्मानम् आधुनिकं मन्यमान्येभ्यः स्वार्थान्धेभ्यः जनेभ्यः ऋषीणां विचारधारा अग्रगण्या। वेदेऽस्ति–

**ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।**



***All rights reserved. © 2025***

The Global Journal of Contextual Thought
(A Double-Blind, Peer-Reviewed, Quarterly, Multidisciplinary Journal)
Volume: 1, Issue: 1 July, 2025 Home Page: www.tgjct.org Email: editor@tgjct.org

| | |
|---|---|
| | ॐ शान्तिः शान्तिः शान्तिः॥[8] |

## भूमिका

अखिले जगति पर्यावरणसंरक्षणविषये जागरः दिने दिने वर्धमानो भवति। अस्मिन् सन्दर्भे जागरणं बहुत्र प्रचलदस्ति। तथापि पर्यावरणसंरक्षणे पूर्णरूपेण जाग्रदवस्था अद्यापि न समुपलब्धा।

पर्यावरण – विषयकं भारतीयचिन्तने वेदेषु, स्मृतिषु, पुराणग्रन्थेषु च पर्यावरण– संरक्षणाय बहुधा निर्देशः प्राप्यते।

## पर्यावरणस्यार्थ

तर्हि प्रश्नमुदेति किं नाम पर्यावरणम् ? अस्य स्पष्टीकरणं तु बहुप्रकारैः भविष्यति। **परि + आ+ वृ धातोः ल्यूट प्रत्यये कृते पर्यावरणशब्दः निष्पद्यते।** परन्तु संक्षेपेण कथ्यते चेत – यानि तत्त्वानि अस्मान् आच्छादयति, अस्माकं चतुर्पार्श्वे विद्यन्ते, अस्माकं कृते ये बहिस्थाः, येषामस्माकमुपरिप्रभावं परिलक्ष्यते, परिनामेण अस्माकं प्रतिक्रियादयः प्रकट्यन्ते, तानि तत्त्वानि पर्यायवरणपदेन समाकलितानि सन्ति।

अस्माकं चतुर्पार्श्वे परिवेष्टिता भौतिक - रासायनिक – जैविकावस्था हि पर्यावरणम्। अस्माकं परितः जल-वायु-मृदु-उद्भिद-जीवधारी-अनुजीवानां च समाहारः एव पर्यावरणम्। एतैः सह प्रकृत्याः अन्यानि पर्वतनदीवृक्षादिरूपाणि उपादानानि मिलित्वा पृथग्रूपेण वा अस्माकं पर्यावरणं रचयन्ति। पर्यावरणस्य उपादानविषये आर्षवचनं भवति –

**यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः।**
**यस्यामिदं जिन्वति प्राणदेजत्सा नो भूमिः पूर्वपेये दधातु॥**[1]

परिशुद्धे पर्यावरणे वयं दैनन्दिनकर्म सद्विचारं सुखेन जीवनयापनं च कर्तुं शक्नुमः। प्रकृतिः फलैः पुष्पैः अन्यैश्च प्रकारैः अस्मान् पुष्णाति। अततस्या रक्षा कर्तव्या।

पर्यावरण-संघटक-तत्त्वानि विषये अथर्ववेदे निद्रिश्यते यत् पर्यावरण-संघटक- तत्त्वेषु तत्त्वत्रयं प्रमुखं वर्त्तते। तानि सन्तिः – आपः(जलम्), वाताः(वायुः), ओषधयः(वनस्पतयः) च। एतानि पर्यावरणं निर्मापयन्ति।

**त्रीनि छन्दांसि कवयो वि येतिरे , पुरुरूपं दर्शतं विश्वचक्षणाम्।**
**आपो वाता ओषधयः, तान्येकस्मिन् भुवन अर्पितानि॥**[2]

## संस्कृतसाहित्ये पर्यावरणम्

अस्माकं मुनयः सर्वदा सर्वेषां हितं कामयन्ते स्म –

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्॥**[3]

भारतीयसंस्कृतौ पर्यावरणस्य विभिन्नानि उपादानानि देवज्ञानेन पूज्यन्ते। वेदपुराणादिशास्त्रेषु आदित्य-चन्द्रमा-पृथ्वी-नदी-पर्वत-वृक्षादीनां देवत्वेन स्तुतिः विद्यते।

आकाशाद्युपादानि हरेः शरीराणि एव। तस्मात्तेषां स्तुतिर्कर्तव्या। अथर्वेदे अस्ति- **"माता भूमिः पुत्रोऽहं पृथिव्याः"**[4] इति। तत्रैवास्ति –**"विशस्वं मातरमौषधीनाम्"**[5] इति। औषधिवनस्पतयः पृथिव्याः उत्पद्यन्ते। प्रकृत्याः उपादानेषु अन्यतमा भवति पृथिवी। अत्र पृथिव्याः मातृरूपेण सम्वोधनं श्रूयते। अस्माकं कृते माता च देवता भवति **" मातृदेवो भव"**[6] इति।

Published By: Atasi Publisher
All rights reserved. © 2025

अन्यच्च प्रकृत्याः उपादानेषु एकं भवति जलम्। सरितः पयोदः गिरिनिर्झराश्च निरिमलं जलं प्रयच्छन्ति। जलचक्रविषये ऋग्वेदेऽस्ति –

**समुद्र ज्येष्ठाः सलिलस्य मध्यात् पुनाना यन्त्यनिविशमानाः।**
**इन्द्रो या वज्री वृषभो वराद त्य आपो देवीरिह मामवन्तु।।**[7]

अतः समस्तजैविकाजैविकोपादानराजीनां समष्टिगतरूपेण कस्यपि स्थानविशेषस्य स्थितावस्था, नियन्त्रणपूर्वकम्, उद्भिदं प्राणिनं प्रति च प्रभावीकरण प्रक्रियारूपेण अपि परिचितः भवति पर्यावरणम्।

जीवधारीणामभिवृद्धिः, जीवनधारणप्रक्रिया, वंशवृद्धिः इत्यादयः प्रत्यक्षाप्रत्यक्षभावेन पर्यावरणेन एव नियन्त्रिताः भवन्ति। पर्यावरणं स्थाणुः न भवति। प्राकृतिकावस्थायाः प्रत्येकस्मिन् स्थले परिवेशः एव सक्रिय – साम्यावस्थां स्थापयति, एषा अवस्था "प्राकृतिक भारसाम्यता" इति पदेन अभिहिता भवति।

आक्सफोर्ड – अभिधानानुसारं – जनजीवनप्रभावकं भौतिकपरिवेष्ठनीगत अवस्थासमूहं च पर्यावरणमिति कथ्यते।
हेनरी महोदयस्यानुसारेण परिवर्तनस्य प्रतिनिधिरूपाणि तत्तवानि समूहरूपेण पर्यावरणमिति अर्थेन प्रयुक्तानि सन्ति। एतानि मानव जीवनस्य समयानुरूपं परिवर्तनं साधयन्ति, स्व – स्वरूपे च परिवर्तनमानयन्ति।

अतः पर्यायवरणमिति कथनेन कानिचन तथ्यानि समक्षमागच्छन्ति। तानि यथा –

1. पर्यावरणं सर्वत्र विद्यते।
2. पर्यावरणमेका बहिस्था शक्तिरस्ति।
3. प्रत्येकस्यमानवस्याभिवृद्धये विकासाय च पर्यावरणं प्रभावक्षमं भवति।
4. पर्यावरणं स्वविधौ सामाजिक – प्राकृतिकशक्तितत्त्वं च अन्तर्भावयति यत् मानवस्य जीवनधारणप्रक्रियां व्यवहारं च प्रभावयति
5. मानवानां मानसिकशारीरिकावस्थां प्रत्यपि प्रभावकं भवति पर्यावरणम्।
6. गर्भाधानादारभ्य मृत्युं यावत् मानवस्योपरि पर्यावरणं स्वप्रभावं विस्तारयति।
7. पर्यावरणं न केवलं वर्तमानं वंशजं प्रभावयति, अपितु अस्य प्रभावं क्रमशः वंशान्तरं प्रति प्रसरति।

प्रचीन काले ओयार्ड ओर्थ, कालिदासादयः कवयः स्वस्व काव्येषु अस्मिन्विषये चर्चा कृतवन्तः आसन्।
पर्यावरणस्य विभागः –

**पर्यावरणम्**

- **प्राकृतिकपर्यावरणम्**
  - भौतिक पर्यावरणम्
    - मृत्तिका
    - वायुः
    - प्रकाशश्च भवन्ति
  - जैविकपर्यावरणम्
    - समस्त जीव – जगद् वृक्ष-वनस्पतयश्च भवन्ति।
- **मानवनिर्मितपर्यावरणम्**
  1. आध्यात्मिक
  2. धार्मिक
  3. दार्शनिक
  4. सांस्कृतिक
  5. सामाजिक


All rights reserved. © 2025

The Global Journal of Contextual Thought
(A Double-Blind, Peer-Reviewed, Quarterly, Multidisciplinary Journal)
Volume: 1, Issue: 1 July, 2025 Home Page: www.tgjct.org Email: editor@tgjct.org

6. शैक्षिक
7. यान्त्रिक
8. राजनैतिक

**पर्यावरणशिक्षायाः अर्थः**

पर्यावरणशिक्षा सा शिक्षा अस्ति यया शिक्षया विश्वसमुदायः पर्यायवरणीय समस्याम् अवगत्य समाधानमन्वेषयति तथा भविष्ये आगम्यमानानां समस्यानामवरोधं करोति।

1. समस्या समाधान (अवरोधः)
2. आगमन निगमानानां करोति।

**पर्यावरणशिक्षायाः उद्देश्यानि** –

1. जागृतिः सम्पादनम् ।
2. ज्ञानसम्पादनम् ।
3. आवृत्ति सम्पादनम् ।

**पर्यावरणप्रदुषणम्** –

**प्रदुषणस्य प्रकाराः -**

1. वायुप्रदुषणम् । 2. जलप्रदुषणम् । 3.भूप्रदुषणम् । 4.ध्वनिप्रदुषणम्
5. वाहनप्रदुषणम् । 6.तापीयप्रदुषणम्। 7.औद्योगिकप्रदुषणम्
8. उच्छिष्टप्रदुषणम्

**वायुप्रदुषणम्**

1. रुपरहितः स्पर्शवान् वायुः ।
2. वायुः प्राणिनां प्राणस्याधारो वर्त्तते ।
3. प्रतिदिनं 22000 वारं श्वासग्रहणं करोति मानवः ।
4. 10 Kg Oxygen नामकः वायोः उपयोगं करोति मानवः।

**वायुमण्डलस्य विभागः** –

1. अधोमण्डलम् । 2. समतापमण्डलम्। 3.मध्यमण्डलम् । 4.आयनमण्डलम्
5.बाह्यमण्डलम् ।

**वायुप्रदुषणस्य निवारणोपायः** –

1. वृक्षारोपणं कर्त्तव्यम् ।
2. धूम्रपानादिनां निराकरणम् ।
3. धूम्रत्यागवाहनानां प्रयोगे नुतत्व सम्पादनम् ।
4. यन्त्रालयः नगराद् दुरं स्थापिताः स्युः ।


All rights reserved. © 2025

5. परमाणु विस्फोटे प्रतिबन्धः।
6. स्फोटकद्रव्याणां विषये प्रतिबन्धः।

**भू-प्रदुषणम्**

1. तत्र गन्धवती पृथ्वी।

**भू-प्रदुषणस्य प्रकाराः** –

1. सामान्यभूमिः। 2. बन्ध्याभूमिः। 3. नमभूमिः। 4.मरुस्थलीयभूमिः
5. लवणयुक्तभूमिः

**भू-प्रदुषणस्य कारणानि** –

1. गृहापशिष्टेन
2. नगरपालिकाऽपशिष्टेन
3. औद्योगिकापशिष्टेन
4. कृष्यपशिष्टेन
5. प्रकृत्या

**भू-प्रदुषणस्य निवारणोपायः** –

1. कीटनाशकरसायनानां प्रयोगे नियन्त्रणम्।
2. वृक्षादीनां छेदेन प्रतिबन्धः।
3. गृहपोशिष्टं निस्तारणं समुचितं स्यात्।

**जलप्रदुषणम्-**

**जलप्रदुषणस्य प्रकाराः** –

1. सामान्यजलम्। 2. लवणयुक्तजलम्। 3.लौहयुक्तजलम्

**जलप्रदुषणस्य कारणानि** –

1. मनुष्यानां दैनिककृतम्।
2. औद्योगिकम् अपशिष्टम्।
3. कीटनाशकरसायनम्।
4. खनिजतैलम्।
5. शवप्रवाहः।
6. अवकरप्रवाहः।

**जलप्रदुषणस्य शुद्धीकरणोपायाः** –

1. वस्त्रेण शुद्धीकरणम्।
2. काष्ठकोयलामाध्यमेन शुद्धीकरणम्।
3. ताम्रपात्रे स्थापनम्।


All rights reserved. © 2025

4. पाचनम्।
5. मृण्मयपात्रं स्थापनम्।

**जलप्रदुषणस्य निवारणोपायः –**

1. अपशिष्टजलस्य निस्तारणम्।
2. औद्योगिकापशिष्टानां निस्थारणम्।
3. कीटनाशकरसायनानां प्रतिबन्धः।

**ध्वनिप्रदुषणम् –**

**कारणानि –**

1. परिवहनम्।
2. औद्योगिकप्रतिस्ठानम्।
3. मनोरञ्जनसाधनानि।
4. गृहपोकरणानि।
5. पूजनोपकरणानि।

**ध्वनिप्रदुषणस्य प्रभावः –**

1. **शारीरिकप्रभावः –**
   a) बधिरः b) अन्तरावरणं छिन्नम् c) हृद्गतेः अवरोधः d) सरीसृपादीनामुपरि प्रभावः
2. **मानसिकप्रभावः –**
   a) सहनशक्तिअभावः b) अनिद्ररोगेन, मानसिकः।

**ध्वनिप्रदुषणस्य निवारणोपायाः –**

1. ध्वनिप्रदुर्षणयन्त्राणां प्रतिबन्धः।
2. वाहनादिषु ध्वनिप्रतिरोधयन्त्रणां प्रयोगः।
3. विस्फोटादीनामुपरि सर्वकारीय प्रतिबन्धः।

**निष्कर्ष**

पर्यावरणस्य सुरक्षार्थं छात्रेभ्यः प्रौढेभ्यः सर्वेभ्यः शिक्षाप्रदानमेकान्तमावश्यकम्। पर्यावरणविषयचेतना शिक्षार्थीनां मनसि अवश्यमेव स्थापनीया। पर्यावरणशिक्षा प्रत्येकस्तरीयविद्यार्थीनां कृते औपचारिकानौपचारिकशिक्षामाध्यमयोः समाहिता अवश्यं भवेत्। भारतीयसंस्कृतौ पर्यावरणचेतना पर्यावरणप्रदूषणनिवारणाय उपायाः च चर्चिताः विद्यन्ते। तत्र स्वात्मानम् आधुनिकं मन्यमान्येभ्यः स्वार्थान्धेभ्यः जनेभ्यः ऋषीणां विचारधारा अग्रगण्या। वेदेऽस्ति–

**ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।**
**ॐ शान्तिः शान्तिः शान्तिः।।**[8]


All rights reserved. © 2025

The Global Journal of Contextual Thought
(A Double-Blind, Peer-Reviewed, Quarterly, Multidisciplinary Journal)
Volume: 1, Issue: 1 July, 2025 Home Page: www.tgjct.org Email: editor@tgjct.org

**पादटिप्पानि**

1. (अथर्व. 12/1/13)
2. (अथर्व. 18/1/17)
3. (बृहदारण्यकोपनिषद्)
4. (अथर्ववेदः–12.11.12)
5. (अथर्व.12.1.16)
6. (तैत्तिरीयोपनिषद्, शिक्षावल्ली – 11.2)
7. (ऋग्वेदः7.49.1)
8. (वृहदारण्यकोपनिषद् – शान्तिपाठः)

**सन्दर्भग्रन्थसूची**

1. समाजानुबन्धने संस्कृतम् , सम्पादकः – डॉ.गिरिधरपण्डा,शिवलिक प्रकाशन, 2021
2. संस्कृतनिबन्धमञ्जुसा,डॉ.उदयशंकरझा,चौखम्वाविद्याभवन,2013
3. पर्यावरणशिक्षा,हरिश्चन्द्र भैस,प्रभातप्रकाशन, 2016


All rights reserved. © 2025